বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## Question Paper

## B.A. Honours Examinations 2022

**(Under CBCS Pattern)**

## Semester - IV

## Subject : SANSKRIT

**Paper : C 8 - T**

**[ INDIAN EPIGRAPHY, PALEOGRAPHY AND CHRONOLOGY ]**

**Full Marks : 60**

**Time : 3 Hours**

*Candidates are required to give their answers in their own words as far as practicable.*
*The figures in the margin indicate full marks.*

1. अधोलिखितेषु प्रश्नेषु ***पञ्च*** सुरगिरा देवनागरीलिप्या समाधेयाः। 2×5=10

(क) भारतवर्षे प्राप्तेषु काव्याभिलेखेषु कस्यचिद् द्वयस्य उल्लेखः कार्यः।

(ख) एलाहाबादप्रशस्त्यौ कस्य नृपस्य कीर्तयो वर्णिताः ? क आसीत् तस्य लेखस्य कविः ?

(ग) दक्षिणभारतस्य ऐहोलेलेखे (Aihole) केषां कवीनाम् उल्लेखो वर्तते ?

(घ) अशोकस्य प्रथममुख्यगिरिशासनस्य गिर्णारसंस्करणे का लिपिः व्यवहृता ? तस्मिन् लेखे 'महानसे' इति पदस्य कोऽर्थः ?

(ङ) ग्रन्थलिपिः शारदालिपिश्च केषु देशेषु प्रचलिते ?

P.T.O.

Vidyasagar University

(च) दीनेशचन्द्रसरकारमहाभागेन कृतस्य कस्यचित् पुस्तकद्वयस्य उल्लेखः कार्यः।

(छ) समुद्रगुप्तस्य एराणाभिलेखे तस्य तुष्टिकोपौ काभ्याम् उपमीयते? एराण इति स्थानस्य प्राचीनं नाम किम्?

(ज) अधोलिखितानां संकेतानां देवनागर्या अंकेन परिणमनं कार्यम् (अंकानां वामागतिरिति सूत्रमवलम्ब्य)।

- नागेन्दुगोत्रक्षितिसंख्ये शाके
- कलारसरसाप्रमाणे विक्रमाब्दे

2. अधोलिखितेषु प्रश्नेषु कस्यचिद् ***चतुष्टयस्य*** उत्तरं प्रदेयम्। 5×4=20

(क) आभिलेखिकमिश्रसंस्कृतविषये टिप्पणी रचनीया।

(ख) भूमिदानपट्टविषये कश्चिद् लघु-निबन्धो विरचनीयः।

(ग) प्राचीनभारतवर्षे लिखनकलायां यानि उपकरणानि व्यवहृतानि तेषु कस्यचिद् द्वयस्य परिचयः प्रदेयः।

(घ) व्याख्या कार्या। 2½+2½

- पुनः सेतुबन्धनैराश्याद् आहाभूतासु प्रजासु इहाधिष्ठाने पौरजानपदानुग्रहार्थम्।
- बहुकं हि दोसं समाजम्हि पसति देवानं प्रियो प्रियदसि राजा।

(ङ) संक्षिप्ता टिप्पणी रचनीया। 2½+2½

लिपिकरः, शकाब्दः।

(च) प्राचीनभारतीयाभिलेखपाठे जेमस्-प्रिन्सेपमहाभागस्य अवदानं विचार्यताम्।

3. अधोलिखितेषु प्रश्नेषु कस्यचित् ***त्रयस्य*** समाधानं कर्तव्यम्। 10×3=30

(क) प्रथमरुद्रदाम्नो जुनानगडाभिलेखमाश्रित्य तस्य नृपस्य समरकीर्त्तय आभिगामिकगुणाश्च वर्णनीयाः। 5+5

(ख) मौर्यनृपतिना अशोकेन प्रणीतस्य सारनाथगौणस्तम्भलेखस्य विषयवस्तु प्रदीयताम्। तस्य लेखस्य महत्वञ्च विचार्यताम्। 4+6



Vidyasagar University

(ग) वैदिक-बौद्ध-जैनसाहित्यानुसृत्य भारतीयलेखनकलायाः प्राचीनता आलोचनीया। 10

(घ) भारतीयोपमहादेशे प्राप्ताः अभिलेखाः कीदृशेषु उपादानसमूहेषु उत्कीर्णाः ? सोदाहरणं लेखनीयम्। 10

(ङ) 'यस्योद्वर्तयतः प्रतीपमुरसा शत्रून् समेत्यागतान्'—कस्मिन् लेखे श्लोकंशोऽयं विद्यते ? तस्मिन् लेखे कस्य नृपस्य कीदृशी प्रशस्तिः उपलब्धा ? तस्य नृपस्य परिचयविषये वुधैः उपस्थापितेषु मतेषु श्रद्धेयतमं किम् ? सयुक्तिकम् आलोच्यताम्। 1+4+5

———

Vidyasagar University